# Kumaristavah

# कुमारीस्तवः

## Document Information

Text title : Kumaristavah

File name : kumArIstavaH.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# कुमारीस्तवः

महाविद्या महासेवा भक्तिश्रद्धाप्लुतार्पितः ॥ ८-१३॥

महाज्ञानी भवेत् क्षिप्रं वाञ्छासिद्धिमवाप्नुयात् ॥ ८-१४॥

आनन्दभैरव उवाच -
देवेन्द्रादय इन्दुकोटिकिरणां वाराणसीवासिनीं
विद्यां वाग्भवकामिनीं त्रिनयनां सूक्ष्मक्रियाज्वालिनीम् ।
चण्डोद्योगनिकृन्तिनीं त्रिजगतां धात्रीं कुमारीं वरां
मूलाम्भोरुहवासिनीं शशिमुखीं सम्पूजयामि श्रिये ॥ ८-१५॥

भाव्यां देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकां
सन्ध्यां नित्यगुणोदयां द्विजगणे श्रेष्ठोदयां सारुणाम् ।
शुक्लाभां परमेश्वरीं शुभकरीं भद्रां विशालाननां
गायत्रीं गणमातरं दिनगतिं कृष्णाञ्च वृद्धां भजे ॥ ८-१६॥

बालां बालकपूजितां गणभृतां विद्यावतां मोक्षदां
धात्रीं शुक्लसरस्वतीं नववरां वाग्वादिनीं चण्डिकाम् ।
स्वाधिष्ठानहरिप्रियां प्रियकरीं वेदान्तविद्याप्रदां
नित्यं मोक्षहिताय योगवपुषा चैतन्यरूपां भजे ॥ ८-१७॥

नानारत्नसमूहनिर्मितगृहे पूज्यां सूरैर्बालिकां
वन्दे नन्दनकानने मनसिजे सिद्धान्तबीजानने ।
अर्थं देहि निरर्थकाय पुरुषे हित्वा कुमारीं कलां
सत्यं पातु कुमारिके त्रिविधमूर्त्या च तेजोमयीम् ॥ ८-१८॥

वरानने सकलिकां कुलपथोल्लासैकबीजोद्भवां
मांसामोदकरालिनीं हि भजतां कामातिरिक्तप्रदाम् ।
बालोऽहं वटुकेश्वरस्य चरणाम्भोजाश्रितोऽहं सदा
हित्वा बालकुमारिके शिरसि शुक्लाम्भोरुहेशं भजे ॥ ८-१९॥

सूर्याह्लादवलाकिनीं कलिमहापापादितापापहां
तेजोऽङ्गां भुवि सूर्यगां भयहरां तेजोमयीं बालिकाम् ।
वन्दे हृत्कमले सदा रविदले बालेन्द्रविद्यां सतीं
साक्षात् सिद्धिकरीं कुमारि विमलेऽन्वासाद्य रूपेश्वरीम् ॥ ८-२०॥

नित्यं श्रीकुलकामिनीं कुलवतीं कोलामुमामम्बिकां
नानायोगनिवासिनीं सुरमणीं नित्यां तपस्यान्विताम् ।
वेदान्तार्थविशेषदेशवसना भाषाविशेषस्थितां
वन्दे पर्वतराजराजतनयां कालप्रियो त्वामहम् ॥ ८-२१॥

कौमारीं कुलकामिनीं रिपुगणक्षोभाग्निसन्दोहिनीं
रक्ताभानयनां शुभां परममार्गमुक्तिसंज्ञाप्रदाम् ।
भार्या भागवतीं मतिं भुवनमामोदपञ्चाननां
पञ्चास्यप्रियकामिनीं भयहरां सर्पादिहारां भजे ॥ ८-२२॥

चन्द्रास्यां चरणद्वयाम्बुजमहाशोभाविनोदीं नदीं
मोहादिक्षयकारिणीं वरकरां श्रीकुब्जिकां सुन्दरीम् ।
ये नित्यं परिपूजयन्ति सहसा राजेन्द्रचूडामणिं
सम्पादं धनमायुषो जनयतो व्याप्येश्वरत्वं जगुः ॥ ८-२३॥

योगीशं भुवनेश्वरं प्रियकरं श्रीकालसन्दर्भया
शोभासागरगामिनं हरभवं वाञ्छाफलोद्दीपनम् ।
लोकानामघनाशनाय शिवया श्रीसंज्ञया विद्यया
धर्मप्राणसदैवतां प्रणमतां कल्पद्रुमं भावये ॥ ८-२४॥

विद्यां तामपराजितां मदनभावामोदमत्ताननां
हृत्पद्मस्थितपादुकां कुलकलां कात्यायनीं भैरवीम् ।
ये ये पुण्यधियो भजन्ति परमानन्दाब्धिमध्ये मुदा
सर्व्वाच्छापिततेजसा भयकरीं मोक्षाय सङ्कीर्तये ॥ ८-२५॥

रुद्राणीं प्रणमामि पद्मवदनां कोट्यर्कतेजोमयीं
नानालङ्कृतभूषणां कुलभुजामानन्दसन्दायिनीम् ।
श्री मायाकमलान्वितां हृदिगतां सन्तानबीजक्रियां
आनन्दैकनिकेतनां हृदि भजे साक्षादलब्धामहम् ॥ ८-२६॥

नमामि वरभैरवीं क्षितितलाद्यकालानलां
मृणालसुकुमारारुणां भुवनदोषसंशोधिनीम् ।

जगद्भयहरां हरां हरति या च योगेश्वरी
महापदसहस्रकं सकलभोगदान्तामहम् ॥ ८-२७॥

साम्राज्यं प्रददाति याचितवती विद्या महालक्षणा
साक्षादष्टसमृद्धिदातरि महालक्ष्मीः कुलक्षोभहा ।
स्वाधिष्ठानसुपङ्कजे विवसितां विष्णोरनन्तप्रिये
वन्दे राजपदप्रदां शुभकरीं कौलेश्वरीं कौलिकीम् ॥ ८-२८॥

पीठानामधिपाधिपां असुवहां विद्यां शुभां नायिकां
सर्वालङ्करणान्वितां त्रिजगतां क्षोभापहां वारुणीम् ।
वन्दे पीठगनायिकां त्रिभुवनच्छायाभिराच्छादितां
सर्वेषां हितकारिणीं जयवतामानन्दरूपेश्वरीम् ॥ ८-२९॥

क्षेत्रज्ञां मदविह्वलां कुलवतीं सिद्धिप्रियां प्रेयसीम् ।
शम्भोः श्री वटुकेश्वरस्य महतामानन्दसञ्चारिणीम् ॥ ८-३०॥

साक्षादात्मपरोद्गमां कमलमध्यसम्भाविनीं
शिरो दशशते दलेऽमृतमहाब्धिधाराधराम् ।
निजमनः क्षोभापहां शाकिनीं
बाह्यार्थ प्रकटामहं रजतभां वन्दे महाभैरवीम् ॥ ८-३१॥

प्रणामफलदायिनीं सकलबाह्यवश्यां गुणां
नमामि परमम्बिकां विषयदोषसंहारिणीम् ।
सम्पूर्णाविधुवन्मुखीं कमलमध्यसम्भाविनीं
शिरो दशशते दलेऽमृतमहाब्धिधाराधराम् ॥ ८-३२॥

साक्षादहं त्रिभुवनामृतपूर्णदेहां
सन्ध्यादि देवकमलां कुलपण्डितेन्द्राम् ।
नत्वा भजे दशशते दलमध्यमध्ये
कौलेश्वरीं सकलदिव्यजनाश्रयां ताम् ॥ ८-३३॥

विश्वेश्वरीं स्वरकुले वरबालिके त्वां
सिद्धासने प्रतिदिनं प्रणमामि भक्त्या ।
भक्तिं धनं जयपदं यदि देहि दास्यं
तस्मिन् महामधुमतीं लघुनाहताः स्यात् ॥ ८-३४॥

एतत्स्तोत्रप्रसादेन कविता वाक्पतिर्भवेत् ।

महासिद्धीश्वरो दिव्यो वीरभावपरायणः ॥ ८-३५॥

सर्वत्र जयमाप्नोति स हि स्याद् देववल्लभः ।
वाचामीशो भवेत् क्षिप्रं कामरूपो भवेन्नरः ॥ ८-३६ ॥

पशुरेव महावीरो दिव्यो भवति निश्चितम् ।
सर्वविद्याः प्रसीदन्ति तुष्टाः सर्वे दिगीश्वराः ॥ ८-३७॥

वह्निः शीतलतां याति जलस्तम्भं स कारयेत् ।
धनवान् पुत्रवान् राजा इह काले भवेन्नरः ॥ ८-३८॥

परे च याति वैकुण्ठे कैलासे शिवसन्निधौ ।
मुक्तिरेव महादेव यो नित्यं सर्वदा पठेत् ॥ ८-३९॥

महाविद्यापदाम्भोजं स हि पश्यति निश्चितम् ।

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावासननिर्णये
पाशवकल्पे षट्चक्र प्रकाशे कुमारीस्तवः नाम अष्टमः पटलम् ॥ २८॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Kumaristavah*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*